## अभ्यास-प्रश्नपत्रम् - 2021-22

## द्वितीयं सत्रम्

**कक्षा - द्वादशी**

**संस्कृतम् (केन्द्रिकम्)(कोड–322)**

**समयः होराद्वयम्** **सम्पूर्णाङ्काः- 40**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 प्रमुखाः प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br><br>जीवने सफलतायाः आधारः पुरुषार्थः एव। अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति । यदा यदा नरः पुरुषार्थम् अचिनोत् तदा तदा तेन सफलता प्राप्ता। पुरुषार्थिनः एव संसारे विलक्षणप्रतिभाम् अर्जितवन्तः। देशसेवया समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि। अस्माकं इतिहासे तेषां गौरवगानं विद्यते । आपत्काले येषां मनांसि विचलितानि न भवन्ति ते एव जीवने सफलतां प्राप्नुवन्ति। पुरुषार्थिनाम् कृते तु पुरुषार्थः एव उपासना अस्ति। यः जनःस्वजीवने सफलतां प्राप्तुम् इच्छति सः पुरुषार्थः अवश्यमेवं कुर्यात्। पुरुषार्थस्य अभावे जनः सफलतां प्राप्तुं न शक्नोति। | 10 |
| | **(अ) एकपदेन लिखत– (केवलं प्रश्नचतुष्टयम्)**<br><br>i. जीवने सफलतायाः आधारः किम्?<br>ii. केषां कृते पुरुषार्थः उपासना अस्ति?<br>iii. के संसारे विलक्षण–प्रतिभाम् अर्जितवन्तः?<br>iv. पुरुषार्थस्य अभावेन नरः किं आप्तुम् असमर्थः भवति?<br>v. यः जनः स्वजीवने सफलतां प्राप्तुम् इच्छति सः किं कुर्यात्? | **½ x4=2** |
| | **(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**<br><br>i. येषां मनांसि आपत्काले विचलितानि न भवन्ति ते किं कुर्वन्ति?<br>ii. जीवने सफलतायाः आधारः कः?<br>iii. कस्य अभावे जनः सफलतां प्राप्तुं न शक्नोति? | **2x2=4** |
| | **(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–** | **1X1=1** |
| | **(ई) यथानिर्देशम् उत्तरत– (केवलं प्रश्नत्रयम्)** | **1x3=3** |

| | | |
|---|---|---|
| | i. 'प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम्?<br>ii. अपयशः' इति पदस्य विपर्ययपदं गद्यांशे किम् प्रयुक्तम्?<br>iii. मानवः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?<br>iv. 'उल्लेखनीयानि' इति पदस्य विशेष्यपदं गद्यांशे किम्? | |
| | | |
| | **रचनात्मकं कार्यम् 15**<br>**अङ्काः** | |
| 2. | **अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत-**<br>भवान् प्रणवः। चेन्नईनगरे छात्रावासे स्थित्वा अध्ययनं करोति। छात्रावासे स्वदिनचर्यायाः वर्णनं कुर्वन् स्वमातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत।<br>(i)............<br>तिथिः.........<br>पूजनीये मातः!<br>सादरं प्रणामाः।<br>अत्र कुशलं तत्रास्तु । भवत्याः पत्रम् प्राप्य मनसि (ii)............जातः यत् पितृमहोदयः इदानीम् (iii) ............ स्वस्थोऽस्ति। सः मम स्वास्थ्यस्य (iv)...............च विषये चिन्तितः आसीत्। परं चिन्तायाः न कोऽपि विषयः। अहम् प्रतिदिनं प्रातः चतुर्वादने (v)..........व्यायामं कृत्वा (vi)............पठामि। ततः स्नात्वा दुग्धादिकं च पीत्वा पादोनसप्त -वादने विद्यालयं गच्छामि। द्विवादने (vii)...........आगत्य भोजनं कृत्वा विश्रामं करोमि। सार्ध-चतुर्वादने उत्थाय गृहकार्यं करोमि । संस्कृतविषये अहम् (viii.............परिश्रमं करोमि। पितृमहाभागानाम (ix)........... प्रणामाः कथनीयाः।<br>भवत्याः प्रियः पुत्रः<br>(x) ................ | ½X10=5 |

**मञ्जूषा**

| |
|---|
| विद्यालयात्, सन्तोषः, अध्ययनस्य, घण्टाद्वयम्, विशेषतया चरणयोः, छात्रावासतः, उत्थाय, प्रणवः, पूर्णरूपेण |

3. **मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितां कथां पूरयत।** ½x10=5

एकदा शीतस्य भीषणः (i)......... अभवत्। सम्राट् चन्द्रगुप्तः निश्चितवान् यत् निर्धनेभ्यः (ii).......... वितरणं भवेत्। प्रधानमंत्री चाणक्यः तत्कार्यं (iii)......... | भृत्याः सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्तः । रात्रौ केचन चौराः कम्बलान् (iv)........... तस्य कुटीरं प्राविशन्। ते अपश्यन् यत् चाणक्यः एकस्मिन् कटे कम्बलं विना एव (v)......। तस्मिन् एव क्षणे (vi).......... पद्ध्वनिं श्रुत्वा प्रबुद्धः। (vii)........ तम् अपृच्छन्- भवतां समीपे कम्बलानां राशिः अस्ति तथापि भवान् कम्बलं विना एव (viii)........ । चाणक्यः अवदत्-'श्रृणुत! एते प्रावारकाः केवलं निर्धनेभ्यःवितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं (ix)........ तर्हि अहम् अपि चौरः भविष्यामि।' "नतमस्तका चौराः"' तस्य पादयोः पतित्वा (x)...............अकुर्वन्।

**मञ्जूषा**

| |
|---|
| स्वीकृतवान्, चोरयितुं, स्वीकरोमि, क्षमायाचनाम्, प्रकोपः, कम्बलानां, सुप्तः, चाणक्यः, चौराः, स्वपिति |

**अथवा**

**अधोलिखित–संवादम् मञ्जूषायाः उचितानि वाक्यानि चित्वा पूरयत उत्तरपुस्तिकायां च लिखत-**

अनीशः-नमस्ते! किम् कुशला त्वम्?

रमा-आम्! (i)---------------------

अनीशः-किं तव समीपम् संगणकयंत्रम् अस्ति?

रमा-आम्! (ii)------------------------

अनीशः-(iii)--------------------------

| | | |
|---|---|---|
| | रमा-त्रिंशत् सहस्ररुप्यकाणि।<br><br>अनीशः-किम् एतेषाम् रुप्यकाणाम् व्ययः सार्थकः अस्ति न वा?<br><br>रमा-(iv)----------------------। अद्यत्वे त्वम् यंत्रे अनेकानि कार्याणि कर्तुम् पारयसि।<br><br>अनीशः-अहम् अपि गृहम् गत्वा कमपि उपायं चिन्तयामि येन मम पिता अपि मम निवेदनं स्वीकुर्यात्।<br><br>रमा-(v)------------------------- | |
| 4. | **'वृक्षाः अस्माकं मित्राणि'** इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत।<br><br>(मञ्जुषाप्रदत्तपदानां सहायता अपेक्षिता चेत् गृहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।)<br><br>**मञ्जूषा**<br><br>वृक्षाः, जलम्, छाया, फलानि पुष्पाणि, काष्ठानि, यच्छन्ति, भूमि-संरक्षणम्, कुर्वन्ति, सत्पुरुषाः इव, पर्यावरणम्, रक्षन्ति<br><br>**अथवा**<br><br>**अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं पञ्चवाक्यम्)**<br><br>i. भारत हमारा देश है ।<br>India is our country.<br>ii. सभी स्वस्थ हों ।<br>Everyone Be healthy.<br>iii. सभी बालक विद्यालय जाते हैं ।<br>Children are going to school.<br>iv. संस्कृत सभी भाषाओं की जननी है ।<br>Sanskrit is the mother of all languages.<br>v. पूरी पृथ्वी ही परिवार की तरह है ।<br>Whole Earth is like a family. | 1x5=5 |

| | | |
|---|---|---|
| | vi. जल का संरक्षण अति आवश्यक है ।<br>Water conservation is necessary<br>vii. गुणी व्यक्ति ही गुण को जानता है, निर्गुण नहीं।<br>Only virtuous person knows the importance of good qualities. | |
| | **पठितावबोधनम्** | 15 |
| 5. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिख**<br><br>पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास-यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच। ततः क्रमात् राजनि दिवंगते संप्राप्तराज्य-संपत्तिर्मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदेऽन्यं नियोजयामास। अथ कदाचन सभायां ज्योतिः-शास्त्रपारंगतः कश्चन ब्राह्मणः समागम्य राजानम् आह-देव! लोकाः मां सर्वज्ञं कथयन्ति। तत्किमपि यथेच्छं पृच्छ।<br><br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>i. राज्ञः नाम किम् आसीत्?<br>ii. सभायाम् आगतः ब्राह्मणः कस्मिन् शास्त्रे पारंगत आसीत्?<br>iii. कः प्रजाः पर्यपालयत्?<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नैकम्)**<br>i. राजा किं विचार्य राज्यं मुजाय दत्तवान्?<br>ii. लोकाः कं सर्वज्ञं कथयन्ति? | **3**<br><br>**½ x2=1**<br><br>**2x1=2** |
| | | |
| 6. | **अधोलिखितं पद्यं पठित्वा तदाधारित-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br><br>आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।<br>कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते॥ | **3** |

| | | |
|---|---|---|
| | **(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br><br>i. कानि आरभेत?<br>ii. कं श्री: निषेवते?<br>iii. पुरुषं का निषेवते?<br><br>**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्)**<br><br>i. कर्माणि कथम् आरभेत?<br>ii. श्री: कीदृशं पुरुषं निषेवते? | **½ x2=1**<br><br><br><br><br>**2x1=2** |
| **7.** | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन लिखत–**<br><br>**कुण्डला-** जाने तेऽभिरुचिम् अध्ययने अध्यापने च। परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते यः तस्याः अवलम्बनं स्यात्।<br>**मदालसा-** नास्ति मत्कृते आवश्यकता अवलम्बनस्य। स्वयं समर्था जीवनपथे चलितुमहम्। न कस्यापि सङ्केतैः नर्तितुं पारयामि।<br>**कुण्डला-** नर्तिष्यसि तदा एकाकिनी एव। (विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि ।<br>**मदालसा-** परं एकः उपायः अपि चिन्ततः मया \|<br>**कुण्डला-** कः उपाय?<br>**मदालसा-** सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यामि ।<br><br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br><br>i. मदालसा केभ्यः शिक्षणं प्रदास्याति?<br>ii. कुण्डला मदालसायाः कि जानाति?<br>iii. नारी कुत्र कमपि सहचरम् अपेक्षते? | **3**<br><br><br><br><br><br><br><br><br><br>**½ x2=1** |

<table>
<tr><td></td><td>(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)<br>i. कुण्डला (विहस्य) मदालसां किं कथयति?<br>ii. नारी किम् अपेक्षते?</td><td>2x1=2</td></tr>
<tr><td>8.</td><td>अधोलिखितस्य पद्यस्य भावार्थं मजूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत–<br><br>एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।<br>आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी॥<br><br>भावार्थः- एकेन अपि (i)---------------विद्यासहितेन (ii)---------------सम्पूर्णः वंशः (iii) -------------- (भवति) येन प्रकारेण (iv)-----------------रात्रिः (प्रसन्ना भवति)।<br><br>मञ्जूषा<br>चन्द्रमसा, प्रसन्नः, सुतेन, सज्जनेन<br><br>अथवा<br><br>प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत –<br>(अ ) दोषेषु यत्नः समुहान्  खलानाम्।<br>i. महतां जनानां दोषेषु यत्नः भवति।<br>ii. दुष्टजनानां दोषेषु एवं यत्नः भवति ।<br>iii. दुष्टकार्येषु प्रयत्नः न करणीयः।<br><br>(आ) आढ्योभिजनवानस्मि कोऽन्यो सदृशो मया।<br>i. अहमेव परिवारसमृद्धः नास्मि अन्येऽपि सन्ति।<br>ii. अभिमानिता मम पार्श्वेऽस्ति न कस्यापि।<br>iii. अहं कुटुम्बयुक्तः धनवान् मत्सदृशः अपरः कः?</td><td>½ x4=2<br><br><br><br><br><br><br><br><br><br>1x2=2</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>9.</td><td>अधोलिखित- अन्वये रिक्तस्थानानि पूरयत -<br><br>अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।<br><br>सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥</td><td>½ x4=2</td></tr>
</table>

| | | |
|---|---|---|
| | **अन्वयः-** शास्त्रम् (i)----------परोक्षार्थस्य (ii)------------ सर्वस्य (iii)--------, यस्य न अस्ति स: (iv)-----एव। | |
| | | |
| 10. | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत- 1/2x4=2<br><br>**क स्तम्भः** — **'ख' स्तम्भः**<br><br>(i) दीर्घप्रयासेन कृतं हि वस्तु — (क) पत्न्याः सहयोगः अनिवार्यः ।<br><br>(ii) लक्ष्म्याः रक्षार्थम् — (ख) श्रान्तः श्रान्तः पुनः पुनः।<br><br>(iii) आरभेत हि कर्माणि — (ग) स्वाध्यायस्तप आर्जवम्।<br><br>(iv) दानं दमश्चयज्ञश्च — (घ) निमेषमात्रेण भजेद् विनाशम्। | 2x1=2 |